# Shri Maruti Stava

# શ્રીમારુતિસ્તવઃ

## Document Information

Text title : mArutistavaH

File name : mArutistavaH.itx

Category : hanumaana

Location : doc_hanumaana

Author : Nityananda Shastri

Transliterated by : Shree Devi Kumar shreeshrii at gmail.com

Proofread by : Shree Devi Kumar shreeshrii at gmail.com

Description/comments : Each line of the composition starts from the rAmarakShA kavacha part (shiro me rAghavaH pAtu)

Latest update : October 21, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 21, 2019

*sanskritdocuments.org*

# શ્રીમારુતિસ્તવઃ

॥ શ્રીમત રામાય નમઃ ॥

એતત્સ્તવીયપચૈકૈકપાદપ્રથમાઽક્ષરૈરુચ્ચાર્યમાણા
રામરક્ષાસ્તોત્રીયાએતે શ્લોકાઃ -
શિરો મે રાઘવઃ પાતુ ભાલં દશરથાત્મજઃ ।
કૌશલ્યેયો દૃશૌ પાતુ વિશ્વામિત્રપ્રિયઃ શ્રુતી ॥ ૧॥

ઘ્રાણં પાતુ મખત્રાતા મુખં સૌમિત્રિવત્સલઃ ।
જિહ્વાં વિદ્યાનિધિઃ પાતુ કણ્ઠં ભરતવન્દિતઃ ॥ ૨॥

સ્કન્ધૌ દિવ્યાયુધઃ પાતુ ભુજૌ ભગ્નેશકાર્મુકઃ ।
કરૌ સીતાપતિઃ પાતુ હૃદયં જામદગ્ન્યજિત્ ॥ ૩॥

મધ્યં પાતુ ખરધ્વંસી નાભિં જામ્બવદાશ્રયઃ ।
સુગ્રીવેશઃ કટી પાતુ સક્થિની હનુમત્પ્રભુઃ ॥ ૪॥

ઉરૂ રઘૂત્તમઃ પાતુ રક્ષઃકુલવિનાશકૃત્ ।
જાનુની સેતુકૃત્ પાતુ જઙ્ઘે દશમુખાન્તકઃ ॥ ૫॥

પાદૌ વિભીષણશ્રીદઃ પાતુ રામોઽખિલં વપુઃ ।
ઇતિ શમ્ ।
॥ શ્રીઃ ॥

અથ શ્રીમારુતિસ્તવઃ ।
॥ શ્રીગણેશાય નમઃ ॥

મઙ્ગલાચરણમ્ ।
રાજતેજૌપમે વિરાજતે યાઽઽસને મહતિ રાજતેઽત્ર સા ।
સર્વદાનવકદગ્નિ સર્વદા સર્વદા દધિમથી મથીનતાત્ ॥ ૧॥

સહંસકા હંસગતિપ્રવીણા વીણામુપાદાય નિજાં સ્વપાણૌ ।

સરસ્વતી સા મમ ચિત્તરઙ્ગેઽરં ગેયમારભ્ય નટીવ નૃત્યાત્ ॥ ૨॥

માધવનન્દનનિત્યાનન્દનતો નન્દનન્દનો નન્દ્યાત્ ।
સ્વપદારવિન્દનન્દિતમિન્દિન્દિરમિન્દિરેશ ! ચાઽઽનન્દ્યાત્ ॥ ૩॥

અથ સ્તવપ્રારમ્ભઃ -
શિઞ્જાનમઞ્જુમુકુટૈઃ સુકુટૈરિવોચ્ચૈ
    રોચિર્ભિરદ્ભિરિવ રુદ્ધતરાઽન્તરાલૈઃ ।
મેધ્યૈઃ સુરૈઃ પદયુગં બહુ સિચ્યમાનં
    રામાઽનુગસ્ય વિનુમો દ્યુતતરૂપમાનમ્ ॥ ૧॥

ધર્મોપમાનભવતાપજુષઃ પુમાંસોઽ-
    વઃ સત્યમેવ સુખદઃ પરિદર્શ્યતે વઃ ।
પાદદ્યુપાદપ ઉદેતિ વનૌકસોઽર્તિ-
    તુચ્છાય એષ ઇતિ તત્તલમાશ્રયધ્વમ્ ॥ ૨॥

ભા યન્નખેભ્ય ઉદિતા મુદિતા સમુદ્ર-
    લઙ્ઘસ્ય સાધુ સમયે સમયાદધસ્તાત્ ।
દર્વીકરેભ્ય ઇવ સૂચયિતું પ્રિયં સ્વં
    શર્મ પ્રયચ્છતુ કપીશપદદ્વયં તત્ ॥ ૩॥

રક્તા હિ યત્ર ભૃશમઙ્ગુલંયો રમન્તેઽ
    થાત્સારિતેવ રુચિરા રુચિરાશ્રયં યમ્ ।
મત્વા પરં વ્રજતિ રક્તતરાઽપિ સસ્વૌ-
    જઃ સંયુતો હનુમતો નુ મતોંઽઘ્રિપદ્મઃ ॥ ૪॥

કૌ ધાવતેઽ તિગમિતામ્બુધયે તુ યસ્મૈ
    શલ્યાદિભિર્વિરહિતાં સહિતાં પ્રકાશૈઃ ।
યેયામિવ સ્ફુટયિતં પદવીં યદીયા
    યોજ્યેવ યાતિ પદરુક્પુરતઃ સ પાતુ ॥ ૫॥

દૃષ્ટ્વા યદીયપદપઙ્કજમેકવારં
    શૌટીર્યવીર્યસહિતં જલરાશિલઙ્ઘે ।
પાપાત્ પ્રમુચ્યત ઇહૈવ નરશ્ચ પૂજ્યોઽ
    તુલ્યો ભવત્યઽવતુ સોઽનિલનન્દનો નઃ ॥ ૬॥

વિત્યજ્ય યાતિ જનકસ્ય ગૃહં હિ જાતા

શ્વાસારતાં સુદધતી સ્વવિવૃદ્ધિકાલે ।
મિથ્યાત્વહીનમિતિ નિર્દિશતીવ યદ્ભાઽ
ત્રસ્થેનવેશ્મ ભજતે ભજ તે પદે હૃત્ ॥ ૭॥

પ્રિય સર્વદૈવ બહુરક્તતરાઽઙ્ગુલીષુ
યઃ શ્રીમતો હનુમતોઽઙ્ઘ્રિયુગપ્રકાશઃ ।
શ્રુત્યાદિકીર્તિતગુણો દશદિક્ષુ સૂર્યોઽ-
તીન્ધેઽયમિત્યઽવગતઃ કવિભિસ્સવોઽવ્યાત્ ॥ ૮॥

ઘ્રાતવ્યભવ્યસુરભિઃ સુરભિઃ સદા પ્ર-
ણન્દન્મનોભિરમરૈર્ભ્રમરૈરિવોચ્ચૈઃ ।
પાપપ્રતાપસુસમાપનતાપરઃ સોઽ-
તુલ્યઃ પુનાતુ પુરુ પાવનિપાદપદ્મઃ ॥ ૯॥

મય્યુચ્છ્રિતાત્મનિ ક એધત આ ઇતીવ
ખજ્યોતિષાં સમુદયાય રુષેવ રક્તા ।
ત્રાસં પ્રદાતુમિત એતિ હિ યત્પ્રભોર્દ્ધ્વં
તાર્યાત્સ દેવ।ભવતો ભવતોઽઙ્ઘ્રિપદ્મઃ ॥ ૧૦॥

ઇતિપાદવર્ણનં સમાપ્તમ્ ॥

મુઞ્ચન્ ફ્ણામજગરોઽતિગરોઽયમિત્થં
ખં સંસ્પૃશન્નુપરિતઃ પરિતશ્ચ યસ્ય ।
સૌલભ્યતઃ પરિચિતઃ કવિભિઃ સુપુચ્છો
મિથ્યાત્વમન્તયતુ નઃ સ સમીરસૂનુઃ ॥ ૧૧॥

ત્રિર્યં સ્વપુચ્છમલમચ્છકશાસુપટ્ટ-
વત્ સન્તતં હ્યુપરિતઃ પરિતઃ પ્રકમ્પ્ય ।
સન્તાડિતા હનુમતા રિપવઃ સ ધૂર્તે-
લઃ કમ્પયેત કિમુનાઽસ્મદરાતિવર્ગમ્ ॥ ૧૨॥

જિત્વાઽક્ષમુચ્છલિતમન્યપરં પ્રતીવાઽઽ-
ક્ષાં કર્ત્તુમીહિતવતઃ સમદં સમાનમ્ ।
વિર્વાલધી રચત ઐદિવ ખં હિ યસ્યાઽ-
ઘાઽસ્માન્ પ્રબોધયતુ સોઽપ્રથમોવનૌકાઃ ॥ ૧૩॥

નિન્યે યમાશુ શમિતાં શમિતસ્વભક્તાઽઽ-

ધિઃ શાન્ત એવ હિ હરિસ્મરણે હનૂમાન્ ।
પાપિદ્વિષાં ચ શમને સ્વયમુદ્ભટઃ સ્વ-
તુલ્યં વ્યધાચ્છમિહ ગુચ્છયતાત્સ પુચ્છઃ ॥ ૧૪॥

કન્દર્પદર્પદલનં ગલનન્દિતાઽહિં
ઠં દધ્યુષોઽવતુ કપેઃ સ્તિમિતઃ સ પુચ્છઃ ।
ભવ્યોઽભવત્તદનુ યસ્ય હિ વાલહસ્તો
રક્ષોદયાઽનુગતિયન્ત્રિતસૂત્રશાલી ॥ ૧૫॥

તન્ચાત્તમામતિમતિં વિહિતસ્તુતીનાં
વન્ધસ્ય તદ્ધનુમતો લલિતં સુલૂમમ્ ।
દિષ્ટાઽહિબન્ધનમરિવ્રજમાશુ યેને
તઃપ્રક્ષતોઽપિ ફણિનેવ બબન્ધ વીરઃ ॥ ૧૬॥

સ્કન્દાભ ઈશજતયા ચ સશક્તિતાયાં
ધૌરેયતાં કપિબલે દધદેધતાં સઃ ।
દિષ્ટ્યા તુ યસ્ય ભવકૂપનિમગ્નજન્તૂન્
વ્યામોહિતાનુપરિ કર્ષતિ પુચ્છરજ્જુઃ ॥ ૧૭॥

યુદ્ધે હિ યેન કરટીવ કરેણ વીરોઽ-
ધઃ પાતયન્ વિટપિનો નહિ વિઘ્નમાપ ।
પાપં લુનાતુ મલમલ્લકિનઃ સુમલ્લ-
તુલ્યસ્ય લૂમમમલં મમ લમ્બિતં તત્ ॥ ૧૮॥

ભુઞ્જીત તત્ફલમિહૈવ સ યો યદઞ્જ્યાજ્-
જૌર્ત્યપ્રદં પરહૃદો નિદિશન્નિતીવ ।
ભવ્યો હિ યોઽરિષુ તમૈક્ષયતર્દ્ધિમાપ્યાઽ-
ગ્રેઃ પૂર્વમાત્મનિ સ પાતુ કપીશપુચ્છઃ ॥ ૧૯॥

શક્તો નિશાચરમહઃશિથિલીકૃતૌ યઃ
કાર્યે વશીકરણ આશુ ચ શૂર એવ ।
મુઞ્ચેદ્વશેસ્થિતમરિં સુકશૈવ શોભૌ-
કઃ પ્રાતુ શૌયમનિશં બહુશઃ સ પુચ્છઃ ॥ ૨૦॥

ઇતિ પુચ્છવર્ણનં સમાપ્તમ્ ॥

કણ્ઠોત્તમાઙ્ગલસિતૌ સુસિતાવિવાઽહી

રૌપ્યાવિવ સ્વતનુજાય હરેણ દત્તૌ ।
સીદદ્ભિરેવમરિભિઃ પ્રવિતર્કિતૌ યૌ
તાવત્ર શં વિતનુતાં કપિરાજબાહૂ ॥ ૨૧॥

પદ્મેશનામકથકાન્પ્રતિ નૃન્પ્રદત્તો-
તિઃશ્રીશદૂત ઉદિતં યમદૂતમન્તે ।
પાત્યં પ્રપાત્ય મિષતો નુ યયોર્દધે તત્-
તુચ્છસ્ય મુદ્ગરયુગં ભજ તદ્ભજૌ તૌ ॥ ૨૨॥

હૃત્યાઽઙ્ગતોઽરિસુદૃશાં મૃતભર્તૃકાણાં
દસ્યોઃ પૃથોઃ સ્વસહસા સહસા ચ હૃત્યા ।
યન્ત્રેણ યોંઽગદમણેર્ભુજયોશ્ચ તત્રાઽ-
જાનાન્નુ દાઽર્થચયમાશુ વિભુઃ સ પાયાત્ ॥ ૨૩॥

મહ્યુદ્ભવાઽર્પિતમણિગ્રહણક્ષણેઽનુ-
દગ્રાઽઽનનસ્ય સુકપેર્નમિતો ભુજો યઃ ।
ન્યસ્ય સ્વકેઽહિસમતાં નતપાણિકોષ-
જિત્। સન્મણીફણમણી મનુતે સ્તુવે તમ્ ॥ ૨૪॥

મત્વા ગિરિં તૃણમિવોદ્ધૃતવાન્કપીશોઽ
ધ્યઙ્ગ હિ યસ્ય સહસા સ હરીશબાહુઃ ।
પાપૈર્નિશાચરચયૈસ્ત્રપયૈવ દૃષ્ટોઽ-
તુલ્યઃ શુચં શમયતામયતાચ્ચ શોભામ્ ॥ ૨૫॥

ખદ્યોતમુદ્ગતમવેત્ય રસાલમેવ
રત્યા તમાશ્રુમિત ઉત્પતતોઽતિ વાતેઃ ।
ધ્વગ્જધ્દૃણિર્ભુજયુગલ્યધિરોહિણી યા
સીદન્નૃણાં દિવિ ગમાયતતા શ્રયે તામ્ ॥ ૨૬॥

નાભસ્વતસ્ય ચ સદર્પકચેષ્ટિતં તદ્
ભિન્દાનમર્તિગણમુજ્જ્વલચારુશોભમ્ ।
જાગ્રત્પલાશપતનં મધુમાધવીયા-
મ્બહ્વીં શ્રિયં તુલયદુચ્યતુ દોર્દ્વયં વઃ ॥ ૨૭॥

વન્યેશિતુર્ભુજલતાઽઙ્ગુલિશાખિકાઽવ્યા-
દાસક્તપાણિદલકઙ્કણિકાઃ ચ તત્ર ।
શ્રદ્ધેયમુત્પૃથુ દરસ્ફુટિતં સુમં તદ્

યઃ સાર્થકઃ કરધૃતઃ ખલુ મુદ્ગરોઽસ્તિ ॥ ૨૮॥

સષ્ઠુ સ્મરામ્યઽપિ ચ તૌ સુકપિપ્રવેષ્ટૌ
ગ્રીવાસુકમ્બુમતિ નાભિજલભ્રમાઢ્યે ।
વેલોત્કટે હનુમતોઽઙ્ગ્યુદધૌ ચ યૌ સાઽઽ
શઃ સત્કવિઃ સુમનુતે તટભિત્તિબન્ધૌ ॥ ૨૯॥

કઞ્જાસનેન રચિતા રિપુતાડનાય
ટીક્યાવિમૌ હનુમતઃ કિમુ દીર્ઘદણ્ડૌ ?।
પા સ્તમ્ભકો હરિરધાદુત ધર્તુમર્યા-
તુન્નં જગન્વિતિ મતૌ નમ વાતિબાહૂ ॥ ૩૦॥

ઇતિ ભુજવર્ણનં સમાપ્તમ્ ॥

સક્તદ્યુતેર્દ્યુતિવિભાતવિભાતકાલોત્-
થિત્યઽચ્છકચ્છવિધૃતો રવિમણ્ડલસ્ય ।
નીકાશભાવમયમાનમથાઽસમાનં
હર્યચ્છભલ્લપતિમન્ત્રિમુખં તદવ્યાત્ ॥ ૩૧॥

નુત્યો રવિઃ કિમુદિતો ન તુ પૂર્વસાનુ-
મત્કૂટ એષ કિમુ રાજતિ પૂર્ણચન્દ્રઃ ?।
પ્રત્યક્ષમેતદહ રા મનિતં તુ યસ્યાઽઽ-
ભુઃ। સમ્મુદા જનકજાઽપ્તિજયાઽઽન્તરાણિ ॥ ૩૨॥

ઊરૂ પ્રતાડયત એવ હિ તસ્ય વાતે
રૂઢપ્રસાદમવલોક્યત આનનાબ્જમ્ ।
રત્યેતિ સંપ્રથિત ઋક્ષમુખૈઃ સદા સ
ધૂતકૃન્નિશાટગણમેજયતાં મુખેન્દુઃ ॥ ૩૩॥

તથ્યં ભવેદજલજો યદિ પદ્મ ઉદ્યદ્-
મઃ સર્વદાઽપિ ચ સ તાપનમણ્ડલેન ।
પાદોત્કરેણ ન હિ જાત્વઽપિ તાપિતઃ સ્યાત્
તુલ્યત્વમાત્મનિ તદૈવ લભેત યેન ॥ ૩૪॥

રત્યા યુતઃ સુકવિવત્સુનિબન્ધદત્તાઽ
ક્ષઃ કિં કથઞ્ચન હઠાત્તપદપ્રયોક્તા ।
કુઞ્ચન્ ભ્રુવૌ વિરચને કવિવર્યમાની

લબ્ધું કવીશ્વરપદં પ્રભવેન્મનુષ્યઃ ? ॥ ૩૫ ॥

વિજ્ઞાય હેતુત ઇતોઽતુલતાં તુ તસ્ય
નાઽમૂદૃશો ગુણગણં હનુમન્મુખસ્ય ।
શક્નોમિ વર્ણયિતુમર્ણવપૂર્ણતાઽનુ-
કૃત પાર્થવં નુ વિરમામિ નમામિ યદ્વા ॥ ૩૬ ॥

જાતં યતો જનકજાઽધિગમોત્તરં ચા-
નુધ્વાનિ ગર્જિતમુદૂર્જિતમાર્જવાઢ્યમ્ ।
નીત્વા સ્વકર્ણપથમબ્ધિતટે ભટેન્દ્રાઃ
સેહુર્ન કર્ણયિતુમર્ણવપૂર્ણગીર્ણમ્ ॥ ૩૭ ॥

તુષ્ટા વિતર્ક્ય શિખિનો ઘનગર્જિત્તં યત્
કૃતસ્નાશ્ચ નૈજલલનાલલનાવિલોલાઃ ।
પાથોધિમાપ્તવત આપ્તવિદેહજસ્ય
તુષ્ટિં હનૂમત ઇવાઽઽતનિતુંવ્યનૃત્યન્ ॥ ૩૮ ॥

જન્તુવ્રજોઽપિ વનજો હૃતભક્તસક્તાઽ-
ઘેહં હિ યત્સપદિ કેસરિનન્દનસ્ય ।
દક્ષં નિશમ્ય મનસાઽવહિતેન ચિત્રં
શર્મપ્રકર્ષમતુલં લભતે સલીલમ્ ॥ ૩૯ ॥

મુખ્યસ્ય મર્કટકુલે બતયાતુધાનાન્
ખાણ્ડ્યં સુનીતવત આશુગજસ્ય યચ્ચ ।
તથ્યં વ્યબુધ્યત તદા જયતોપશબ્દં
કઃ સત્કવિર્નહિ કપીન્દ્રમુખં તદવ્યાત્ ॥ ૪૦ ॥

ઇતિ મુખવર્ણનં સમાપ્તમ્ ॥

પાદેન યોઽરિશિરસિ પ્રહર્તિ વિધાય
દૌઃખ્યપ્રદાં સ્વચરણસ્ય ચ શોણિમાનમ્ ।
વિજ્ઞો ન્યદર્શયત રક્તમિષેણ નૂનં
ભીનાશકઃ કપિવરોઽસ્તુ સ મે પ્રસન્નઃ ॥ ૪૧ ॥

ષટ્પભિદ્રીશ્વરપદામ્બુજયોર્યકઃ પ્ર-
ણત્ય સ્થિતોઽલિરિતિ ચાશુગજશ્ચ નાગૈઃ ।
શ્રીમન્મૃગારિભિરુ કેસરિપુત્ર ઇત્યઽ-

દઃ સંપ્રધાર્ય જગૃહે સ્વત એવમેભિઃ ॥ ૪૨॥

પાતાત્સ પાવનિરપાવનપાપપાતાત્-
તુન્નસ્વકાનિહ ભવે પરિધિન્વિતુન્નઃ ।
રાગાઽઽત્તરામ ઇતિ ચાક્ષજયી નિરાગા
મોક્ષપ્રદોઽપ્યવિહિતસ્વસુભક્તમોક્ષઃ ॥ ૪૩॥

ખિન્નત્વમાપ્ય રુદિતેન ચ યોઽસ્ત્રપત્વં
લઙ્કૌકસામૃતમસાધયદાઞ્જનેયઃ ।
વન્દ્યઃ સ્વ ઐક્ષત શિવોદ્ભવતાં યયા ચાઽઽ-
પુઃ ક્ષેમમાત્મસુહૃદઃ સ કરોતુ ભદ્રમ્ ॥ ૪૪॥

ઇતિ શ્રીહનુમદ્ વર્ણનં સમાપ્તમ્ ॥

આદ્યાઽક્ષરપ્રકટિતોત્તમરામરક્ષા-
સ્તોત્રીયપદ્યમણિનાઽત્યઽમુના સ્તવેન ।
રક્ષા ભવત્યુભયતસ્ત્વિતિ ગેય ઇત્યોઽ-
ષ્ટવ્યસ્તથૈષ પઠનીય ઉચેલિમોઽર્ચ્યઃ ॥ ૪૫॥

દાધીચવંશ ઉદયે હ્યુદિયાય કાસ-
લ્યોપાહ્વયશ્છિર ઇનો દ્વિજરામવક્ષઃ ।
તસ્યાત્મજેષુ કિલ પઞ્ચસુ પૂર્વજન્મા
શ્રીમાધવોઽધરત ધીરધુરન્ધરત્વમ્ ॥ ૪૬॥

એકાત્મવૃત્તરચને વિદધત્પ્રતિજ્ઞા
શાસ્ત્રાર્થસંલપનમાધિત યઃ સભાસુ ।
શ્રીગટ્ટુલાલબુધતર્કગિરેશતારા-
નાથાદિભિર્ગુણિવરૈશ્ચ બહુપ્રશસ્તઃ ॥ ૪૭॥

તત્પુત્રયોર્ભગવતીતિપદાદિલાલો
જ્યેષ્ઠોઽસ્તિ પણ્ડિતવરઃ પિતૃલબ્ધવિદ્યઃ ।
તસ્યાઽનુજેન ચ સુશિષ્યવરેણ નિત્યા-
નન્દાભિધેન બુધપાદસુકિઙ્કરેણ ॥ ૪૮॥

એષ સ્તવોઽરચિ મયોત્સવવૈજયન્ત્યાં
સમ્પૂર્ણવાસરમહાધુરિ વૈ જયન્ત્યામ્ ।
લોકાન્ પ્રમોદજલધાવનુમજ્જયન્ત્યાં

વર્ષેત્રિષણ્નવકુગે હનુમજ્જયન્ત્યામ્ ॥ ૪૯॥

પુરોભાગિતયા હીનાઃ પુરો ભાગિતયા યુતાઃ ।
ઉત્સાહયેયુરત્રાઽઽર્યા દયાદૃક્પાતનેન મામ્ ॥ ૫૦॥

ઇતિશ્રીયોધપુરસ્થદાધિમથ (દાહિમા) કાસલ્યોપાખ્ય-
ધીરધુરીણશ્રીમાધવાત્મજાઽઽશુકવિ
પણ્ડિત નિત્યાનન્દશાસ્ત્રિરચિતઃ
શ્રીમારુતિસ્તવઃ સમાપ્તઃ ॥ શુભં ભવતાત્ ॥

Encoded and proofread by Shree Devi Kumar shreeshrii at gmail.com

---

*Shri Maruti Stava*

pdf was typeset on October 21, 2019

Please send corrections to *sanskrit@cheerful.com*